कुम्भपदी । शतपदी । अष्टापदी । जालपदी । एकपदी । मालापदी । मुनिपदी । गोधापदी । गोपदी । [1]कलशीपदी । घृतपदी । दासीपदी । निष्पदी । आर्द्रपदी । कुणपदी । कृष्णपदी । द्रोणपदी । द्रुपदी । शकृत्पदी । सूपपदी । पञ्चपदी । अर्वपदी । स्तनपदी[2] । कुम्भपद्यादिः ॥

## सङ्ख्यासुपूर्वस्य । (१४०/८७९)

सङ्ख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेः पादशब्दान्तस्य लोपो भवति समासान्तः । द्वौ पादौ अस्य द्विपात् । त्रिपात्[3] । शोभनौ पादौ अस्य सुपात्[4] ॥

## वयसि दन्तस्य दतृ । (१४१/८८०)

सङ्ख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेर्यो दन्तशब्दः, [5]तस्य दतृ इत्ययमादेशो भवति समासान्तः वयसि गम्यमाने । ऋकार उगित्कार्यार्थः । द्वौ दन्तौ अस्य [6]द्विदन् । [7]त्रिदन् । चतुर्दन् । शोभना दन्ताः अस्य [8]समस्ताः जाताः सुदन् कुमारः । वयसि इति किम् ? द्विदन्तः कुञ्जरः । सुदन्तो दाक्षिणात्यः[9] ॥

## छन्दसि च । (१४२/३६०)

छन्दसि [10]च दन्तशब्दस्य दतृ इत्ययमादेशो भवति समासान्तः बहुव्रीहौ समासे । [11]पत्रदतमालभेत । [12]उ॒भया॑दतः (ऋ. १०.९०.१०) आलभते[13] ॥

## स्त्रियां सञ्ज्ञायाम् । (१४३/८८१)

[14]स्त्रियामन्यपदार्थे सञ्ज्ञायां विषये [15]दन्तशब्दस्य दतृ इत्ययमादेशो भवति । [16]अयोदती । फालदती । सञ्ज्ञायाम् इति किम् ? समदन्ती । [17]स्निग्धदन्ती ॥

## विभाषा श्यावारोकाभ्याम् । (१४४/८८२)

श्याव अरोक इत्येताभ्यां परस्य दन्तशब्दस्य दतृ इत्ययमादेशो भवति विभाषा [18]समासान्तो बहुव्रीहौ[19] । श्यावदन्, श्यावदन्तः । अरोकदन्, [20]अरोकदन्तः । अरोको [21]निर्दीप्तिः । सञ्ज्ञायाम् इत्येव, श्यावदन्तः । अरोकदन्तः ॥

---

1. कुशूलपदी क. फ. 2. स्थूलपदी सूत्रपदी कलहंसपदी द्विपदी विषपदी सुपदी सूकरपदी सूचीपदी इत्यधिकम् ब. 3. चतुष्पात् इत्यधिकम् ब.ड. 4. कथं गूढपात् ? सञ्ज्ञायां सर्वस्य भवत्येव इत्यधिकम् ड. 5. तदन्तस्य फ. 6. बालकस्य इत्यधिकम् ब.क.फ. 7. त्रिदन् नास्ति ड. 8. समस्ताः जाताः नास्ति फ. 9. एकदन्तो विनायकः इत्यधिकम् ह, उगित्कार्यात् द्विदती त्रिदती सुदती इत्यधिकम् ड. 10. विषये इत्यधिकम् ब.क.ग.ड.फ.ह. 11. अपन्नदती भवति । उभयतोदतो यथा ह. 12. उभयतो दतः प्रतिगृह्णाति क. फ. 13. छन्दसि इति किम् ? उभयतोदन्ताः अश्वादयः इत्यधिकम् ड. 14. नित्यविषये इत्यधिकम् क. 15. दन्तस्य क. 16. अयः इव दन्तः यस्याः इत्यधिकम् ड. 17. सिद्धदन्ती ह. 18. सञ्ज्ञायां विषये इत्यधिकम् ड. 19. समासे इत्यधिकम् क. 20. अरो॰दन्तः नास्ति ड. 21. निस्तेजाः क.